।।ॐ श्रीपरमात्मने नमः।।

# शिवसंकल्पसूक्तम्

## शुक्लयजुर्वेदः (अध्यायः ३४, मन्त्रः १-६)

शिवं कल्याणं विद्यते अस्य इति शिवः। सङ्कल्पः इति मनोगतव्यापारः, कर्मसधनाय आत्माभिलापः वा। अतः शिवः सङ्कल्पः इति शिवसङ्कल्पः अर्थात् कल्याणकारीसंकल्पः शुभसंकल्पः वा। शुक्लयजुर्वेदस्य अस्मिन् सूक्ते ईश्वरप्रदत्तस्य अस्माकं मनसः विशेषसामर्थ्याणां वर्णना दरीदृश्यते। दर्शनशास्त्रानुसारं मनस्तावत् अन्तरिन्द्रियमेकमिति। अस्माकम् अपराणि इन्द्रियाणि मनसः अधिगतानि एव। अस्माकं सकलानि कार्याणि मनसः सहयोगनैव सम्पाद्यन्ते। अमनयोगी कदापि कार्यं सुष्ठरूपेण न निष्पाद्यन्ते। मनसा आदौ वयं सङ्कल्पः कुर्मः तदनन्तरं कार्यं सम्पादयामः। सः संकल्पः यदि शुभः भवेत् तर्हि कार्यमपि शुभम् भवति। कुसंकल्पेन कुकार्याणि उत्पादयन्ति। स्थूलदेहे सूक्ष्मरूपेण विराजते अस्माकं मनः। तस्य तुल्यं तीव्रगतिः जगति कस्यापि नास्ति। अतः तस्य नियन्त्रणं अवश्यकर्तव्यम्। अनियन्त्रितमनसा स्वस्य क्षतिः समाजस्य च। मनुष्याणां मनः अत्यन्तक्षमतावान् अस्ति तत्र यः संकल्पः उत्पद्यते तदनुसारं कार्यं भविष्यति। अतः अस्मिन् सूक्ते ऋषिभिः श्रेष्ठकल्याणप्रदस्य मनसः प्रार्थना क्रियते।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।।१।।

**<u>अन्वयसहितवङ्गानुवादः</u>** – यत् (যে) मनः (মন) जाग्रतः (জাগ্রত অবস্থাতে) दूरं उद् आ एति (দূরে গমন করে) सुप्तस्य तथा एव एति (ঘুমন্ত বা সুষুপ্তি অবস্থাতেও তেমনি দূরে গমন করে) तत् उ (সেই মনই নিশ্চিতরূপে)

ज्योतिषाम् दूरंगमम् ज्योतिः (ইন্দ্রিয়সকলের মধ্যে দূরগামী জ্যোতি) देवम् एकम् (জীবাত্মার ওই মন ই একমাত্র দিব্য সাধন) तत् (সেই প্রকার) मे मनः (আমার মন) शिवसंकल्पम् अस्तु (শুভ সঙ্কল্পযুক্ত হোক)।

<u>**व्याख्या**</u> – मनसः स्वभावः तावत् गतिशीलता। कदापि तत् एकत्र नैव तिष्ठति। अतः आर्षमतम् एतत् अस्माकं जाग्रतसमये अस्माकं मनः यथा दूरादतिदूरं गच्छति तथैव निद्रासमयेऽपि तत् दूरादतिदूरं गच्छति। अस्माकं सकलेन्द्रियाणां मध्ये तदेव प्रधानं ज्योतिस्वरूपम्। यतो हि मनसः अनुसारमेव सकलेन्द्रियाणि कार्यविशेषाणि कुर्वन्ति। तत् मनः विज्ञानात्माविशिष्टम्। तादृशं मम मनः शिवसंकल्पयुक्तं भवतु इति।

धर्मो रक्षति रक्षितः